# ॥ विष्णु स्तुतिः ॥

ॐ ॥ बहुदुःखभरोदर्कस्तमसोग्रतमोऽधमः ।
नरको नर को वा तं मतिमानतिवर्तते ॥ १ ॥

नरकान्तकपादाब्जपरिचर्यापरान्नरान् ।
विना विनायकाद्यर्चापरोऽप्युच्चतरोऽरितः ॥ २ ॥

पतेत्तत्र न तत्राणं कुर्युस्ते पर्युपासिताः ।
पश्य दृश्यपदद्वंद्वस्यार्थं न व्यर्थधीर्भव ॥ ३ ॥

असुरो हि सुरक्लेशकरो नरकनामकः ।
तस्य हन्ता सतां चिन्तासन्तापाद्यन्तकृन्न किम् ॥ ४ ॥

विशेषेण घ्नंति कार्यं विघ्नास्तेषामधीश्वरः ।
आरब्धशुभकार्याणां विरुद्धस्य हि नायकः ॥ ५ ॥

अजामिलो द्विजः पूर्वमतिचक्राम केन तान् ।
ससुराः कस्य भजकाः कुतो वा तत्र चक्रमुः ॥ ६ ॥

इति चिन्तय तेनापि सन्देहं छिन्धि मन्द ते ।
गङ्गासेतू पापभङ्गकरौ कोऽकुरुत प्रभुः ॥ ७ ॥

हयाननस्य वाक्फिष्यो नाभिपुत्रः पदार्चकः ।
गुरुर्हि तस्य भ्रूभङ्गः शिवाय स्यात्सतां सदा ॥ ८ ॥

वादिराज यतिप्रोक्तं स्तोत्रमेतत्पठन्सदा ।
वादे विजयमाप्नोति नाधो याति कदाचन ॥ ९ ॥
॥ इति श्रीमद्वादिराजपूज्यचरणविरचितं विष्णुस्तुतिः संपूर्णा ॥